होवाच जीवलश्चैलकिः” शत० ब्रा० २।३।१।३४। चैलकिश्च “चैलक उन्माद शाण्डिल्यायन” इति शत० ब्रा० १०।४।५।२०। शाण्डिल्यगोत्रे उक्तः।

**चैलधाव** त्रि० चैलं वस्त्रं धावति मार्ष्टि धाव–णिजि अण् उप० स०। वस्त्रक्षालके रजके (धोपा) “चैलधावसुराजीविसहोपपतिवेश्मनाम्” याज्ञ० तदन्नभोजनं निषिद्धम्।

**चोकुटि** पु० गोत्रप्रवरभेदे हेमा० प्रवरा०।

**चोक्ष** पु० १स्वभावसिद्धशुचिषु वनप्रदेशेषु। “अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि” मनुव्या० कुल्लू०। तत्र भवं यत्। चौक्ष्य तत्रभवे उदके “अचौक्ष्यसलिलक्षालितयोनिम्” सुश्रुतः। “शुचौ दक्षे च चोक्षःस्यात्” त्रिका० उक्ते २दक्षे। “ब्रह्मावन्तो दयावन्तश्चोक्षाश्चोक्षजनप्रियाः” भा० अनु० १४४अ०।

**चोच** न० चु–बा० च। १वल्कले २चर्म्मणि धरणिः। प्रशस्तं चोचमस्यास्ति अच्। ३त्वक्पत्रे पु० अमरः ४गुडत्वचि शब्दार्थ०। स्वार्थे क। तत्रार्थे “दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोचकेत्यादि” सुश्रु०।

**चोड** पु० चुल–समुच्छ्राये अच् लस्य डः। १प्रावरणे २देशभेदे ब० व० मेदि०। चोलशब्दे दृश्यम्।

**चोडी** स्त्री चुल–अच् गौरा०ङीष् लस्य डः। शाट्यां हेमच०।

**चोद** पु० चोदयति चुद–अच्। अश्वादेः प्रेरके १कशादौ। “जघने चोद एषां वि सक्थानि नरो यमुः” ऋ०४।६१।२। “चोदः प्रेरिका कशा अराग्रकाष्ठविशेषो वा” २प्रेरकमात्रे त्रि० “चोदः कुविन्तुज्यात् जातमेवितः” ऋ० १।१४३।७। “चोदः प्रेरकः” भा०।

**चोदक** पु० चुद–ण्वुल्। १प्रवर्त्तके विधिवाक्ये “वर्त्तमानोपदेशाच्चोदनाशब्दात् स्तुत्यर्थाभावात्तवैचेति वचनान्निर्देशात् कर्मचोदकः” कात्या० श्रौ० १।१०।१ “अग्नीदग्नीनित्यादिः कर्मचोदकः कर्मविधायकः विधिवाक्यमित्यर्थः न तु मन्त्रः। कुतः वर्त्तमानोपदेशात् एवमादयो वर्त्तमानमर्थमनुष्ठेयत्वेन यत उपदिशन्ति अग्निविहरणं कर्त्तव्यं स्तरणं च कर्त्तव्यमित्येवमुपदिश्यते किं च चोदनाशब्दात् अपि च एषु प्रैषेषु चोदनाशब्दो विधिशब्दोऽस्ति विधौ हि लोट् स्मर्यते। लोट् चेति” पा०। लोटो मध्यमपुरुषवचनानि चैतानि विहर स्तृणीहि आसादयेत्यादीनि तस्मादपि कर्मचोदका एते” कर्कः २प्रेरकमात्रे त्रि०

**चोदन** न० चुद–भावे ल्युट्। १प्रवर्त्तने चोदनाशब्दार्थे। “प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्” मनुः। २प्रेरणमात्रे च “कार्य्यकारणसन्देहे भवत्यन्योन्यचोदनात्” भा० अनु० १अ०। कर्त्तरि ल्यु। ३चोदके त्रि०। “अपिप्रयं चोदना वा मिमाना” यजु० २९।७। “चोदना चोदनानि कर्म्माणि” वेददी०।

**चोदना** स्त्री चु० चुद-युच्। “चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः” इति भट्टोक्ते प्रवर्त्तनावाक्ये “चोदनालक्षणोऽर्थो धर्म्मः” इति मीमांसासूत्रम्। २प्रेरणायां, ३प्रवर्त्तनायाञ्च। चोद्यतेऽनया करणे बा० युच् ४प्रवृत्तिहेतौ च “ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना” गीता। “ज्ञानमिष्टसाधनमिति बोधः, ज्ञेयमिष्टसाधनं कर्म्म। परिज्ञाता एतज्ज्ञानाश्रयः, कर्म्मचोदना कर्म्म चोद्यते प्रवर्त्त्यतेऽनया चोदना ज्ञानादित्रितयं प्रवृत्तिहेतुरित्यर्थः” श्रीधरः। ५अज्ञातार्थज्ञापके शब्दमात्रे–“चोदनाप्रवृत्तिभेदाच्च” “या हि चोदना धर्म्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते यथाऽक्षसन्निकर्षेणार्थाऽवबोधे तद्वत्” शा० सू० शाङ्करभाष्यम्। “अज्ञातज्ञापकः शब्दः चोदना तस्याः प्रवृत्तिर्बोधकत्वं तद्वैलक्षण्याच्च जिज्ञास्यभेद इत्यर्थः। संग्रहवाक्यं विवृणोति या हीति लक्षणं प्रमाणं “स्वर्गकामोयजेत” इत्यादि वाक्यं हि स्वविषये धर्मे यागादिके स्वर्गभावनारूपे फलहेतुयागादिगोचरनियोगे वा हितसाधने यागादौ वा, पुरुषं प्रवर्त्तयदेवावबोधयति “अहमात्मा ब्रह्म” इत्यादि वाक्यं तु पुरुषं केवलमप्रपञ्चं ब्रह्म बोधयत्येव न प्रवर्त्तयति विषयाभावात् नन्ववबोध एव विषयोऽस्तु तत्राह न पुरुष इति ब्रह्मचोदनया पुरुषोऽवबोधे न प्रवर्त्त्यते इत्यत्र हेतुं पूर्ववाक्येनाह अवबोधस्येति। स्वजन्यज्ञाने स्वयं प्रमाणं न प्रवर्त्तकमित्यत्र दृष्टान्तमाह यथेति मानादेव बोधस्य जातत्वात् जाते च तस्मिन् विध्ययोगात् न वाक्यार्थज्ञाने पुरुषप्रवृत्तिः। तथा च प्रवर्त्तकमानमेयो धर्मः, उदासीनमानमेयं ब्रह्मेति” रत्नप्रभा। लौगाक्षिभास्करेणापि “वेदप्रतिपाद्यप्रयोजनवदर्थो धर्म्मः” इति धर्मलक्षणमुक्त्वा “चोदनालक्षणोऽर्थो धर्म” जै० सूत्रस्यचोदनापदस्य वेदमात्रपरत्वमुररीकृतम्। तल्लक्षणे चार्थपदस्य इष्यमाणपरत्वेन